# શ્રીગુરુપરમ્પરા

shrIguruparamparA

sanskritdocuments.org

May 13, 2018

# shrIguruparamparA

# શ્રીગુરુપરમ્પરા

## Sanskrit Document Information

Text title : guruparamparA

File name : guruparamparA.itx

Category : deities_misc, gurudev, rAmAnujasampradAya

Location : doc_deities_misc

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીગુરુપરમ્પરા

॥ શ્રીઃ ॥

શ્રીમતે રામાનુજાય નમઃ
શ્રીમતે વેદાન્તમહાગુરવે નમઃ
શ્રીમતે રામાનુજાય નમઃ । શ્રીલક્ષ્મીનૃસિંહ પરબ્રહ્મણે નમઃ ।
અસ્મદ્ગુરુભ્યો નમઃ । અસ્મત્પરમગુરુભ્યો નમઃ ।
અસ્મત્સર્વગુરુભ્યો નમઃ । શ્રીમતે વેદાન્તગુરવે નમઃ ।
શ્રીમતે રામાનુજાય નમઃ । શ્રીપરાઙ્કુશદાસાય નમઃ ।
શ્રીમદ્યામુનમુનયે નમઃ । શ્રીરામમિશ્રાય નમઃ ।
શ્રીપુણ્ડરીકાક્ષાય નમઃ । શ્રીમતે નાથમુનયે નમઃ ।
શ્રીમતે શઠકોપાય નમઃ । શ્રીવિષ્વક્સેનાય નમઃ ।
શ્રીશ્રિયૈ નમઃ । શ્રીધરાય નમઃ ॥

ૐ
અસ્મદ્દેશિકમસ્મદીયપરમાચાર્યાનશેષાન્ ગુરૂન્ ।
શ્રીમલ્લક્ષ્મણયોગિપુઙ્ગવમહાપૂર્ણં મુનીનાં મુનિમ્ ॥ ૧॥

રામં પદ્મવિલોચનં મુનિવરં નાથં શઠદ્વેષિણમ્ ।
સેનેશં શ્રિયમિન્દિરાસહચરં નારાયણં સંશ્રયે ॥ ૨॥

સર્વદેશદિશાકાલેષ્વવ્યાહતપરાક્રમઃ ।
રામાનુજાર્યદિવ્યાજ્ઞા વર્ધતામનુવર્ધતામ્ ॥ ૩॥

રામાનુજાર્યદિવ્યાજ્ઞા પ્રતિવાસરમુજ્જ્વલા ।
દિગન્તવ્યાપિની ભૂયાત્સા હિ લોકહિતૈષિણી ॥ ૪॥

શ્રીમન્ શ્રીરઙ્ગશ્રિયમનુપદ્રવામનુદિનં સંવર્ધય ।
નમો રામાનુજાર્યાય વેદાન્તાર્થપ્રદાયિને ॥ ૫॥

આત્રેયપદ્મનાભાર્યસુતાય ગુણશાલિને ।

રામાનુજદયાપાત્રં જ્ઞાનવૈરાગ્યભૂષણમ્ ॥
શ્રીમદ્વેઙ્કટનાથાર્યં વન્દે વેદાન્તદેશિકમ્ ॥ ૬॥

લક્ષ્મીનાથસમારમ્ભાં નાથયામુનમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥ ૭॥

યો નિત્યમચ્યુતપદામ્બુજયુગ્મરુક્મ-
વ્યામોહતસ્તદિતરાણિ તૃણાય મેને ।
અસ્મદ્ગુરોર્ભગવતો સદયૈકસિન્ધોઃ
રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

માતા પિતા યુવતયસ્તનયા વિભૂતિઃ
સર્વં યદેવ નિયમેન મદન્વયાનામ્ ।
આદ્યસ્ય નઃ કુલપતેર્વકુલાભિરામં
શ્રીમત્તદઙ્ઘ્રિયુગલં પ્રણમામિ મૂર્ધ્ના ॥ ૯॥

ભૂતં સરશ્ચ મહદાહ્વય ભટ્ટનાથ
શ્રીભક્તિસારકુલશેખરયોગિવાહાન્ ।
ભક્તાઙ્ઘ્રિરેણુપરકાલયતીન્દ્રમિશ્રાન્
શ્રીમત્પરાઙ્કુશમુનિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧૦॥

ગુરુમુખમનધીત્ય પ્રાહ વેદાનશેષાન્
નરપતિપરિક્લૃપ્તં શુલ્કમાદાતુકામાઃ ।
શ્વશુરમમરવન્દ્યં રઙ્ગનાથસ્ય સાક્ષાત્
દ્વિજકુલતિલકં તં વિષ્ણુચિત્તં નમામિ ॥ ૧૧॥

ઇતિ શ્રીગુરુપરમ્પરા ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIguruparamparA*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*